ISSN: ISSN: 2583-5149 | Vol-4, Issue-1 | July 2026

# संस्कृतनाटकेषु प्रमुखनाटकीयतत्त्वानि

**पूजा-यादवः**

शोधच्छात्रा, संस्कृतप्राकृतभाषाविभागः

लखनऊविश्वविद्यालयः, लखनऊ

**शोधसारः-** भारतीयसाहित्ये संस्कृतनाटकम् अद्वितीयस्थानं लभते। भरतमुनेः नाट्यशास्त्रं नाट्यकलां वैज्ञानिकाधारं प्रयच्छति। संस्कृतनाटकं न केवलं मनोरञ्जनसाधकम् अपि तु समाजस्य संस्कृतेः धर्मस्य नीतेश्च मार्गदर्शकं वर्तते। शोधपत्रेऽस्मिन् संस्कृतनाटकस्य प्रमुखनाटकीयतत्त्वानि- कथा, पात्रं, रसः, भाषाशैली, अभिनयः, रङ्गमञ्चं प्रभृतीनि विवेचितानि।

**प्रस्तावना-** संस्कृतसाहित्यं भारतीयसंस्कृतेः प्राणाः सन्ति किञ्च तत्र नाटकप्रमुखविधाः वर्तन्ते। संस्कृतनाटकं न केवलं साहित्यिकरचना अपि तु सामाजिकस्य, धार्मिकस्य सांस्कृतिकचेतनायाः दर्पणमस्ति। शोधपत्रमिदं संस्कृतनाटकस्य नाटकीयतत्त्वानां विश्लेषणं प्रस्तौति। संस्कृतसाहित्ये काव्यापेक्षया नाटकस्य महत्त्वम् अधिकं वर्तते। काव्यानन्दात् वञ्चितव्यक्तिः नाटकस्य मनोहरम् अभिनयं दृष्ट्वा अलौकिकानन्दम् अनुभवति।

सर्वप्रथमं भरतमुनिना स्वकीयग्रन्थे नाट्यशास्त्रे षट् त्रिंशत् अध्यायेषु नाट्यशास्त्रस्य प्रामाणिकं तथा विस्तृतविवेचनं प्रस्तुतम्। नाट्यशास्त्रस्य महत्त्वं कथयन् तस्य कथनं यत् विश्वे यत् कानि अपि ज्ञानं, शिल्पं, विद्या, कला, योगः, कर्म च न सन्ति यत् नाटके न अन्तर्भवन्ति।

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**

**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।**[i]

**रूपकम्-** संस्कृतस्य काव्यशास्त्रिभिः काव्यं भागद्वयेन विभक्तम्- 1) दृश्यं 2) श्रव्यञ्च

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।**

**दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्।।**[ii]

दृश्यकाव्ये रूपकस्य तथा उपरूपकस्य ग्रहणं भवति, यतो हि तस्य अभिनयः क्रियते। काव्यकलायाम् अनुकरणवृत्तिं मूलकारणत्वेन अङ्गीकर्तुं शक्यते। यतो हि पाश्चात्यदार्शनिकेन अरस्तूना कला अनुकरणत्वेन स्वीकृता। नाटके अनुकरणं स्पष्टतया दृश्यते। आचार्यः धनञ्जयः नाट्यस्य संक्षिप्तलक्षणं कथयन् आह **"अवस्थानुकृतिर्नाट्यमं रूपकं तत्समारोपात्"**[iii] अर्थात् अवस्थायाः अनुकरणमेव नाट्यं कथ्यते। यत्र काव्ये वर्णितस्य धीरोदात्तस्य, धीरोद्धतस्य, धीरललितस्य, धीरप्रशान्तस्य च प्रकृतेः नायकस्य आङ्गिकं, वाचिकम्, आहार्यं तथा सात्त्विकम् इति चतुर्भिः अभिनयैः अवस्थायाः अनुकरणं क्रियते तत् नाट्यम्। रूपकस्य दश भेदाः भवन्ति यत् आचार्यधनञ्जयानुसारम् अधोलिखितं वर्तते-

**नाटकं सप्रकणं भाणः प्रहसनं डिमः।**

**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।।**[iv]

**नाटकम्-** दशप्रकाररूपकेषु नाटकं रूपकस्य एकप्रकारं वर्तते। आचार्यः विश्वनाथः स्वकीयग्रन्थे साहित्यदर्पणे नाटकस्य परिभाषाम् अकथयत्-

**नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।**

**विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः।।**

**सुखदुःखसमुद्भूति नानारसनिरन्तरम्।**

**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः।।**

**प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।**

**दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः।।**

**एक एव भवेदङ्गी श्रृङ्गारो वीर एवं वा।**

**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः।।**[v]

**नाटकस्य तत्त्वानि-** नाटके त्रीणि तत्त्वानि हि 1) विषयवस्तु, 2) नेता तथा 3) रसश्च। रूपके एकस्मात् अपरं भिन्नत्वेन प्रतपादयन्ति प्रमुखतत्त्वानि।

**1.विषयवस्तु-** नाटकस्य विषयवस्तुनः तात्पर्यं तस्य नाटकस्य मूलविचारात्, कथानकात्, भावात्, उद्देश्यात् तथा सन्देशात् भवति। सरलशब्दैः एतत् वक्तुं शक्यते कस्यापि नाटकस्य विषयवस्तु तदेव भवति यस्य आधारेण सम्पूर्णं नाटकं रच्यते। आचार्यधनञ्जयानुसारं विषयवस्तु द्विविधं- 1) आधिकारिकं, 2) प्रासङ्गिकञ्च-

**वस्तु नेता रसस्तेषां भेदकः वस्तु च द्विधा।**

**तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विंदुः।।**[vi]

आचार्यविश्वनाथानुसारं-

**इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते।**

**आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम्।।**[vii]

**आधिकारिकं कथावस्तु-** मुख्यं कथावस्तु आधिकारिकं कथावस्तु कथ्यते। अधिकारस्य अभिप्रायः फलस्य स्वामित्वाभिप्रायः। किञ्च अधिकारी फलस्य स्वामी उच्यते। "**अधिकारः फले स्वाम्यधिकारी च तत्प्रभुः।**"[viii] फलस्य भोक्तृद्वारा प्राप्तिपर्यन्तं निर्वाहितकथा आधिकारिकं कथावस्तु कथ्यते।

**प्रासङ्गिकं कथावस्तु-** प्रासङ्गिकं कथावस्तु मुख्यकथावस्तुनः सहायिका भवति। या कथा अपरार्थं प्रयुज्ञते किन्तु प्रसङ्गात् यस्य स्वयं फलमपि सिद्धं भवति तत् प्रासङ्गिकं वृत्तम्। **"तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः"।**

**2.नेता-** नायकः नाम यः त्यागभावनया पूर्णः, महतः कार्यस्य कर्ता, कुलस्य महान्, बुद्धवैभवेन सम्पन्नः, रूपयौवनोत्साहसम्पत्त्या सम्पन्नः, निरन्तरम् उद्योगशीलः, जनतायाः स्नेहभाजनः, तेजस्वितायाः, चतुरातायाः सुशीलतायाः च निदर्शकः अस्ति।

**त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।**

**दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता।।**[ix]

नायकस्य अपि केचन भेदाः सन्ति। आचार्यः विश्वनाथः सर्वप्रथमं षोडश भेदान् प्रदर्शितवान्-

1) धीरोदात्तः, 2) धीरोद्धतः, 3) धीरललितः 4) धीरप्रशान्तश्च।

**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।**

**धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः।।**[x]

एतेषां धीरदात्तधीरोद्धतधीरललितधीरप्रशान्तानां चतुर्णां नायकानामपि प्रत्येकं दक्षिणधृष्टानुकूलशठभेदेन साकल्येन षोडश भेदाः।

**"एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा।।"**[xi]

आचार्यभरतमुनिकृतनाट्यशास्त्रे नायकस्य चत्वारः भेदाः उक्ताः-

**धीरोद्धतो धीरललिता धीरोदात्तास्तथैव च।**

**धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः।।**[xii]

श्रीशिङ्गभूपालकृतरसार्णवसुधाकरानुसारं नायकस्य चत्वारः भेदाः तथा तेषाम् उपभेदाः वर्णिताः।

**नेता चतुर्विधोऽसौ धीरोदात्तश्च धीरललितश्च।**

**धीरप्रशान्तनामा ततश्च धीरोद्धतः ख्यातः।।**[xiii]

समस्तरसानां कृते सामान्यरूपेण एते नायकाः प्रोक्ताः। श्रृङ्गारदृष्ट्या आचार्येण त्रयः नायकभेदाः उक्ताः- 1) पतिः, 2) उपपतिः, 3) वैशिकश्च।

**"पतिश्चोपपतिश्च वैशिकश्चेति भेदतः।"**[xiv]

आचार्येण पतिवृत्त्यनुसारम् अनुकूलशठधृष्ठदक्षिणभेदेन चत्वारः भेदाः।

**चतुर्धा सोऽपि कथितो वृत्त्या काव्यविचक्षणैः।**

**अनुकूलः शठो धृष्टो दक्षिणश्चेति भेदतः।।**[xv]

आचार्यधनञ्जयानुसारं नायकस्य चत्वारः भेदाः तथा तेषाम् उपभेदाः उक्ताः। **"भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम्।"**

आचार्यधनञ्जयानुसारं यदा नायकः नवीन-(कनिष्ठा)नायिकां प्रति हृतचित्तः भवति तदा स पूर्व-(ज्येष्ठ)नायिकां प्रति दक्षिणशठधृष्टानुकूलप्रकृत्यनुकूलः भवति। **"स दक्षिणः शठो धृष्टः पूर्वां प्रत्यन्यया हृतः।"**

आचार्यरामचन्द्रगुणचन्द्रकृतनाट्यदर्पणग्रन्थे अपि नायकस्य चत्वारः भेदाः उक्ताः-

**उद्धतोदात्त-ललित-शान्ता धीरविशेषणाः।**

**वर्ण्याः स्वभावाश्चत्वारो नेतृणां मध्यमोत्तमाः।।**[xvi]

निष्कर्षतः नायकः चतुर्विध इति स्वीक्रियते- 1) धीरोदात्तः, 2) धीरोद्धतः, 3) धीरललितः, 4) धीरप्रशान्तश्च।

**3.रसः-** विभावानुभावसात्त्विकभावव्यभिचारिभावैः यदा रत्यादिस्थायीभावः आस्वाद्ययोग्यः जायते तदा स रसः कथ्यते। श्रृङ्गारादयः अष्टौ रसाः तथा शान्तं स्वीकृत्य नव रसाः गृह्यन्ते। भावपदेन अष्टौ स्थायिनः, अष्टौ सात्त्विकाः तथा त्रयस्त्रिंशत् व्यभिचारिणः इति साकल्येन ऊनपञ्चाशत् भावाः स्वीक्रियन्ते।

**"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।"**[xvii]

आचार्यः भरतमुनिः स्वकीयग्रन्थे नाट्यशास्त्रे केवलम् अष्टौ रसान् उल्लिखति-

**श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।**

**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।।**[xviii]

श्रृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भूतश्च इति अष्टौ रसाः नाट्ये विधीयन्ते।

आचार्यः शिङ्गभूपालः अपि स्वग्रन्थे रसार्णवसुधाकरे अष्टौ रसान् समर्थयति। स शान्तरसं रसश्रेणीषु न गणयति। **"अष्टधा स च श्रृङ्गारहास्यवीराद्भूता अपि।"**[xix]

आचार्यविश्वनाथानुसारं-

**विभावेनानुभावेन व्यक्तः संचारिणा तथा।**

**रसतामेति रत्यादिः स्थायी भावः सचेतसाम्।।**[xx]

साहित्यदर्पणकारस्य एषा परिभाषा नाट्याचार्यभरतमुनेः रससूत्रस्य मनेरमा सरला विवृतिः वर्तते। **"शान्तः शमस्थायिभावः उत्तमप्रकृतिर्मतः"**[xxi]

आचार्यरामचन्द्रगुणचन्द्रः स्वग्रन्थे नाट्यदर्पणे, आचार्यः मम्मटः स्वग्रन्थे काव्यप्रकाशे किञ्च आचार्यः धनञ्जयः स्वग्रन्थे दशरूपके एवं प्रकारेण रसपरिभाषां स्वीकुर्वन्तः नव रसान् समर्थयन्ति।

एवं प्रकारेण रूपके एकः एव रसः मुख्यरूपेण अभिव्यक्तः आवश्यक। अपि च मुख्यतया अभिव्यक्तः रसः श्रृङ्गारः वीरः वा स्यात्। यः रसभावः अस्ति सोऽपि अभिव्यक्तः तिष्ठति। किन्तु मुख्यरूपेण नास्ति अपि तु अङ्गरूपेण(मुख्यरसस्य उपकारकरूपेण) एव। **"एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा।"** आचार्यः धनञ्जयः अपि मतमिदं समर्थयति। **"एको रसोऽङ्गी कर्तव्यो वीरः श्रृङ्गार एव वा।"**[xxii]

**उपसंहारः-** नाट्यविषयकाणां मूलतत्त्वानां निरूपणमेव अस्य शोधविषयस्य उद्देश्यम्। नाट्यस्य विवेच्यविषयाः तावत्- विषयवस्तु, नेता, रसः, भावः, अभिनयः, धर्मी, वृत्तिः, प्रवृत्तिः, सिद्धिः, स्वरः, गानं रङ्गमञ्चं च। यदा कस्मिंश्चिद् नाटके किमपि ऐतिहासिकं तथा पौराणिकं कथावस्तु लक्षणानुसारं कुलीनस्य तथा प्रख्यातवंशस्य शूरः, दृढः, तेजस्वी, शास्त्रज्ञाता, तथा धार्मिकः नेता, श्रृङ्गारवीररसयोः एकप्रधानरसत्वेन युक्ततया नाटकसाहित्यजगति स्वकीयम् एकं स्थानं प्राप्तुं शक्नोति किञ्च समाजे सहृदयजनेषु अनुकरणयोग्यं भवति।

## सन्दर्भग्रन्थसूची-

---

[i] नाट्यशास्त्रम्(1/116), आचार्यभरतमुनिप्रणीतम्, विद्यानिधिप्रकाशनम्, खजूरीखासम्, दिल्ली

[ii] साहित्यदर्पणः(6/1), आचार्यविश्वनाथप्रणीतः,(डा. सत्यव्रतसिंहस्य व्याख्या), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001

[iii] दशरूपकम्, आचार्यधनञ्जयप्रणीतम्(डा. भोलाशङ्करव्यासः), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001, पृ.- 4

[iv] तत्रैव, पृ.- 5

[v] साहित्यदर्पणः(6/7,8,9,10), आचार्यविश्वनाथप्रणीतः,(डा. सत्यव्रतसिंहस्य व्याख्या), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001

[vi] दशरूपकम्, आचार्यधनञ्जयप्रणीतम्(डा. भोलाशङ्करव्यासः), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001, पृ.- 7

vii साहित्यदर्पणः(6/7,8,9,10), आचार्यविश्वनाथप्रणीतः,(डा. सत्यव्रतसिंहस्य व्याख्या), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001

viii तत्रैव, (6/43), पृ- 383

ix तत्रैव, (3/30), पृ- 138

x तत्रैव, (3/30), पृ- 138

xi तत्रैव, (3/30), पृ 141

xii नाट्यशास्त्रम्, भरतमुनिप्रणीतम्, अध्यायः- 24

xiii रसार्णवसुधाकरः, श्रीशिङ्गभूपालविरचितः(व्याख्याकारः- डा. जमुनापाठकः), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी, पृ.- 18

xiv तत्रैव, पृ.- 23

xv तत्रैव, पृ.- 24

xvi नाट्यदर्पणः, आचार्यरामचन्द्रगुणचन्द्रप्रणीतः, प्रकाशकः- हिन्दीविभागः, दिल्लीविश्वविद्यालयः, दिल्ली

xvii नाट्यशास्त्रम्, आचार्यभरतमुनिप्रणीतम्, विद्यानिधिप्रकाशनम्, खजूरीखासम्, दिल्ली

xviii तत्रैव, पृ.-157

xix रसार्णवसुधाकरः, श्रीशिङ्गभूपालविरचितः(व्याख्याकारः- डा. जमुनापाठकः), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी, पृ.- 245

xx साहित्यदर्पणः(3/1), आचार्यविश्वनाथप्रणीतः,(डा. सत्यव्रतसिंहस्य व्याख्या), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001

xxi तत्रैव, भूमिका, पृ.- 35

xxii दशरूपकम्, आचार्यधनञ्जयप्रणीतम्(डा. भोलाशङ्करव्यासः), चौखम्बाविद्याभवनप्रकाशनम्, वाराणसी- 221001, पृ.- 167